Serial Number

# E-204

Roll No. 

हायर सेकेण्डरी मुख्य परीक्षा - 2022
Higher Secondary Examination (Main) - 2022

## संस्कृत

## SANSKRIT

| Total Questions : 23 | Total Printed Pages : 8 | Time : 3 Hours | Maximum Marks : 80 |
|---|---|---|---|

**निर्देशाः** – (i) सर्वे प्रश्नाः अनिवार्याः सन्ति ।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः ।

1 प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरुत – 1×7=7

(क) 'निधाय' इत्यस्मिन् पदे ........... प्रत्ययः अस्ति । (शतृ/ल्यप्)

(ख) 'गतः' पदे ........... प्रत्ययः अस्ति । (क्तवतु/क्त/क्त्वा)

(ग) 'श्रुत्वा' पदे ........... प्रत्ययः अस्ति । (क्त/क्त्वा/ल्यप्)

(घ) 'जगच्चक्षुषि भास्करे' इत्यस्मिन् ........... विशेषणपदम् अस्ति । (जगच्चक्षुषि/भास्करे)

(ङ) 'राजेन्दुः दिलीपः अस्ति ।' आस्मिन् वाक्ये ........... विशेष्यपदम् अस्ति । (राज/इन्दुः/दिलीपः)

(च) 'अल्पज्ञः एव पुरुषः प्रलपति अजस्रम्' वाक्ये विशेषणपदम् अस्ति । (अल्पज्ञः/पुरुषः/प्रलपति)

(छ) 'ऋतध्वजः शत्रुजितः आसीत्' अस्मिन् वाक्ये ........... विशेष्यपदम् अस्ति । (ऋतध्वजः/शत्रुजितः/आसीत्)

2 एकपदेन उत्तरं लिखत - 1×7=7

(क) त्रिविधं कस्य द्वारम् ?

(ख) दिलीपः प्रजानां भूत्यर्थं कम् अग्रहीत् ?

(ग) शरीरे कः प्रहरति ?

(घ) 'शर्वरी' पदस्य पर्यायपदं लिखत ।

(ङ) 'गजः' पदस्य पर्यायपदं किम् अस्ति ?

(च) 'त्याज्यः' पदस्य विलोमपदं लिखत ।

(छ) 'नृपः' पदस्य विलोमपदं लिखत ।

3 उचितं विकल्पं चित्वा लिखत : 1×7=7

(क) 'वसुधाधिपः' पदस्य समासविग्रहः अस्ति –

(i) वसुधा अधिपः (ii) वसुधायाः अधिपः

(iii) वसुधे अधिपः (iv) वसु अधिपः

(ख) 'बहुब्रीहिः' समासस्य उदाहरणम् अस्ति –

(i) महाबाहुः (ii) वनराजः

(iii) गतौ (iv) पितरौ

(ग) 'प्रत्यहं' पदे समासः अस्ति –

(i) कर्मधारयः (ii) तत्पुरुषः

(iii) अव्ययीभावः (iv) द्विगुः

(घ) 'पतिपत्न्यौ' पदस्य समासविग्रहः भविष्यति –

(i) पतिः च पत्नी (ii) पतिः पत्नी च

(iii) पतिः च पत्नी च (iv) पतिः पत्नी

(ङ) अधोलिखितेषु अव्ययपदम् अस्ति –

(i) च (ii) गच्छति

(iii) पठ (iv) लेशः

(च) अधोलिखितेषु अव्ययपदं न अस्ति -

(i) यदा (ii) कदा

(iii) तदा (iv) पता

(छ) अधोलिखितेषु अव्ययपदम् अस्ति -

(i) पत्र (ii) सत्र

(iii) यत्र (iv) सूत्र

4 उचितमेलनं कुरुत 1×6=6

| क | | ख |
|---|---|---|
| (i) | छायेव | लट्लकार: |
| (ii) | आसीत् | दीर्घसन्धि: |
| (iii) | एकेनापि | गुणसन्धि: |
| (iv) | सत्यान्न | लङ्लकार: |
| (v) | प्रहरति | विसर्गसन्धि: |
| (vi) | कोऽत्र | व्यञ्जनसन्धि: |

5 शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – 1×5=5

(क) 'स्वजनात्' पदे चतुर्थी विभक्तिः अस्ति ।

(ख) 'अवतीर्य' पदे 'अव' उपसर्गः अस्ति ।

(ग) 'निनादं' पदे 'निन' उपसर्गः अस्ति ।

(घ) 'अध्ययने' पदे 'सप्तमी' विभक्तिः अस्ति ।

(ङ) 'विधाय' पदे 'वि' उपसर्गः अस्ति ।

**प्रश्नक्रमाङ्कः षट्तः एकादश पर्यन्तं पूर्णवाक्येन उत्तरं लिखत –**

6 जगतः क्षयाय के प्रभवन्ति ? संस्कृते उत्तरं लिखत । 2

**अथवा**

रविः रसं किमर्थम् आदत्ते ? संस्कृते उत्तरं लिखत ।

7 कदा हल्दीघाटी मतिमाननीयां शोभां दधाति ? संस्कृते उत्तरं लिखत । 2

**अथवा**

बुद्धः किमर्थं तपोवनं प्रविष्टः ? संस्कृते उत्तरं लिखत ।

8 दिलीपस्य कार्याणाम् आरम्भः कीदृशः आसीत् ? संस्कृते उत्तरं लिखत । 2

**अथवा**

राधापूर्णतया आत्मनः किं कर्तुं वाञ्छति ? संस्कृते उत्तरं लिखत ।

9 कस्मिन् सति कस्य अकालः नास्ति ? संस्कृते उत्तरं लिखत । 2

**अथवा**

पिकालिगीतः किमिव मातुः पूजनं करोति ? संस्कृते उत्तरं लिखत ।

10 रामस्य अभिषेकः कथं निवृत्तः ? संस्कृते उत्तरं लिखत । 2

**अथवा**

केषां समाजे अपण्डितानां मौनं विभूषणम् ? संस्कृते उत्तरं लिखत ।

11 दौवारिकः सन्यासिनं कम् अमन्यत् ? संस्कृते उत्तरं लिखत । 2

**अथवा**

ऋतध्वजस्य नारीं प्रति का धारणा आसीत् ? संस्कृते उत्तरं लिखत ।

12 अधोलिखितेषु द्वयोः वाक्ययोः रेखांकितपदान्याधृत्य प्रश्ननिर्माणं कुरुत – 2

(i) शरीरे अरिः प्रहरति ।

(ii) पितरः जन्महेतवः आसन् ।

(iii) महाराजशिववीरस्य आज्ञां वयं शिरसा वहामः ।

13 अधोलिखितेषु वाक्येषु द्वयोः वाक्ययोः कः कं प्रति कथयति इति लिखत – 2

(i) न शक्नोमि रोषां धारयितुम् ।

(ii) रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम् ।

(iii) नारी जीवनयात्रायां कमपि सहचरमपेक्षते ।

14 कति वेदाङ्गानि सन्ति ? तेषां नामानि लिखत । 2

अथवा

कति वेदाः सन्ति ? तेषां नामानि लिखत ।

15 युग्ममेलनं कुरुत – (कोऽपि चत्वारः) 2

| | क | ख |
|---|---|---|
| (i) | कादम्बरी | श्रीहर्षः |
| (ii) | रघुवंशम् | विष्णुशर्मा |
| (iii) | पञ्चतन्त्रम् | भवभूतिः |
| (iv) | महावीरचरितम् | बाणभट्टः |
| (v) | नैषधचरितम् | कालिदासः |

16 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 3

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्याय–प्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । https://www.mpboardonline.com

(i) आचार्यः कम् अनुशास्ति ?

(ii) धर्मात् किं न कर्त्तव्यम् ?

(iii) काभ्यां न प्रमदितव्यम् ?

अथवा

अथ दीपस्य समीपमागत्य सन्यासिनोक्तम् 'दौवारिक ! न मां प्रत्यभिजानासि' ततः पुनर्निपुणं निरीक्षमाणो दौवारिकः तं पर्यचिनोत् आः ! कथं श्रीमान् गौरीसिंहः ? आर्य ! क्षम्यतामनुचितव्यवहार एतस्य ग्रामवराकस्य ।'

(i) दीपस्य समीपमागत्य सन्यासिना किम् उक्तम् ?

(ii) सन्यासिरूपे कः आसीत् ?

(iii) दौवारिकः सन्यासिनम् अभिज्ञाय तं किं प्रार्थयत् ?

17 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम उत्तराणि संस्कृतभाषायां लिखत 3

अजीर्णे भेषजं वारि जीर्णे-वारि बलप्रदम् ।

भोज्ने चामृतं वारि भोजनान्ते विषापहम् ॥

(i) भोजनान्ते किं विषम् ?

(ii) अजीर्णे किं भेषजम् अस्ति ?

(iii) जीर्णे वारि कीदृशं भवति ?

**अथवा**

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।

मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥

(i) आसुरी सम्पद् कस्मै मता ?

(ii) कः दैवी सम्पदम् अभिजातः ?

(iii) दैवी सम्पद् कस्मै मता ?

18 अधोलिखितं संवादं (नाट्यांशं) पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत - 3

सीता - गृहणात्वार्यपुत्रः ।

रामः - मैथिलि ! किं व्यवसितम् ।

सीता - ननु सहधर्मचारिणी खल्वहम् ।

रामः - मयैकाकिना किल गन्तव्यम् ।

सीता - अतो नु खल्वनुगच्छामि ।

रामः - वने खलु वस्तव्यम् ।

सीता - तत् खलु मे प्रासादः ।

रामः - श्वश्रूश्वशुरशुश्रूषापि च ते निर्वर्तयितव्या ।

सीता - एनामुद्दिश्य देवतानां प्रणामः क्रियते ।

रामः - लक्ष्मण ! वार्यतामियम् ।

लक्ष्मणः- आर्य ! नोत्सहे श्लाधनीये काले वारयितुमत्र भवतीम् ।

(i) रामः सीतां किम् अपृच्छत् ?

(ii) रामेण लक्ष्मणं किम् उक्तम् ?

(iii) लक्ष्मणः किम् उत्तरम् अददात् ?

**अथवा**

मदालसा सङ्गीतसाहित्यमाध्यमेन ब्रह्मविद्यां सरसां विधाय बहुभ्यः शिशुभ्यः शिक्षणं प्रदास्यामि ।

कुण्डला गृहस्थाश्रमं प्रविश्य स्वशिशूनां चरित्रनिर्माणं मातुराधीनम् । तत्र का विचारणा ।

मदालसा यथाहं पश्यामि पुरुषः भार्यायां स्वाधिपत्यं स्थापयति । द्रौपदीं स्वीयां सम्पत्तिं मन्यमानः युधिष्ठिरः तां द्यूते हारितवान् यथा सा निर्जीवं वस्तु आसीत् ।

(i) मदालसा केन माध्यमेन ब्रह्मविद्यां सरसां विधाय शिशुभ्यः शिक्षणं दातुम् इच्छति ?

(ii) शिशूनां चरित्रनिर्माणं कस्याः अधीनं भवति ?

(iii) कः द्यूते द्रौपदीं हारितवान् ?

**19** प्रदत्तैः शब्दैः त्रयाणां रिक्तस्थानानि पूरयत– 3

(कर्माणि, शोचितुम्, वेदोपनिषत्, नास्ति)

(i) एषा ............ ।

(ii) न त्वं ............ अर्हसि ।

(iii) यान्यनवद्यानि ............ तानि सेवितव्यानि ।

(iv) अकालः ............ धर्मस्य ।

**20** प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य श्लोकद्वयं लिखत । 4

**21** अधोलिखितम् अपठितगद्यांशं सम्यक् पठित्वा चतुर्णां प्रश्नानाम् उत्तराणि संस्कृते लिखत– 4

कुटिलाः जनाः स्वभावेन परेषाम् अहितम् इच्छन्ति । तेषां शक्तिः परेषां पीडनाय बुद्धिः च परेषां वञ्चनाय भवति । तेषां मनसि अन्यत्, वचसि अन्यत् कर्मणि च अन्यत् भवति । शान्तिवचनानि तान् सन्मार्गे आनेतुं न प्रभवन्ति । शुनः पुच्छः प्रयत्नेनापि कुटिलतां न त्यजति । दुग्धं पीत्वा अपि सर्पाः विषं न त्यजन्ति । कुटिलाः कुटिलतया एव सन्मार्गम् आश्रयन्ति ।

(i) के स्वभावेन परेषाम् अहितम् इच्छन्ति ?

(ii) कुटिलानां शक्तिः किमर्थं भवति ?

(iii) दुग्धं पीत्वा अपि के विषं न त्यजन्ति ?

(iv) कुटिलानां बुद्धिः किमर्थं भवति ?

(v) शुनः पुच्छः प्रयत्नेनापि कां न त्यजति ?

22. प्रदत्तैः शब्दैः अनुच्छेदलेखनं कुरुत - 4

(स्थिरीभूय, समायाति, कोऽत्र, एष, पुनः, निरीक्षमाणः, कस्यापि, भुशुण्डीं)

संवृत्ते किञ्चिदन्धकारे ........... स्कन्धे निधाय निपुणं ........... आगत-प्रत्यागतं च विदधानः, प्रतापदुर्गदौवारिकः ........... पादक्षेपध्वनिमिवाश्रौषीत् । ततः ........... पुरतः पश्यन् सत्यपि दीपप्रकाशे कमप्यनवलोकयन् गम्भीरस्वरेणैवम् अवादीत् - 'कः ........... भोः ? कः कोऽत्रः भोः ?' इति ।

अथ क्षणानन्तरं ........... स एव पादध्वनिरश्रावीति भूपः साक्षेपमवोचत् - 'क ........... मामनुत्तरयन् मुमूर्षुः ........... बधिरः ।'

**अथवा**

(कोऽपि, पतिपत्न्यौ, कुपात्रेषु, उपदेशस्य, रक्षितव्या, पतिः, तदापि, सहायिनी)

परस्परप्रीतिमतोः भवतो ........... नास्ति कोऽपि अवकाशः ........... सखीस्नेहः मां भाषयति–भर्त्रा सदैव भार्याभर्तव्या ........... च । यतो हि धर्मार्थकामसंसिद्धये यथा भार्या भर्तुः ........... भवति तथा न ........... अन्यः । परस्परमनुव्रतौ ........... त्रिवर्गं साधयतः । ........... यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति तत खलु पत्न्यभावे ........... दीपमानं क्षयमेति ।

23. अधोलिखितेषु एकस्य कवेः संक्षिप्त परिचयं लिखत 4

(i) कालिदासः

(ii) भारविः

(iii) माघः

(iv) अश्वघोषः